"रजनीतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय ! कामिनां प्रियाः
त्वदृते प्रापयितुं क ईश्वरः ॥" )

**वसती**, स्त्री, ( वसति+कृदिकारादिति ङीष् । ) वासः । यामिनी । निकेतनम् । इति मेदिनी । ते, १५० ॥

**वसनं**, क्ली, ( वस्यते आच्छाद्यतेऽनेनेति । वस्+ल्युट् । ) वस्त्रम् । इत्यमरः ॥ ( यथा, गीतगोविन्दे । १ । १२ ।

"वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशवधृतहलधररूप !
जय जगदीश हरे ! ॥"

वसनमिति । वस्+भावे ल्युट् । ) छादनम् । इति मेदिनी । ने,१२३॥ (वस+आधारे ल्युट् ।) निवासः । (यथा, महाभारते । ५ । ४३ । ६० ।

"मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः ।
स्वलक्षणन्तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥")

स्त्रीकटीभूषणम् । इति शब्दरत्नावली ॥

**वसना**, स्त्री, ( वस+युच् । ) स्त्रीकटीभूषणम् । यथा,—

"सारसनं चारशनं वसना वशना तथा ।
वसनं वस्त्रनञ्चेति स्त्रीकटीभूषणे भवेत् ॥"

इति शब्दरत्नावली ॥

**वसन्तः**, पुं, ( वसन्त्यत्र मदनोत्सवा इति । वस+"तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।" उणा० ३ । १२८ । इति झच् । ) ऋतुविशेषः । स च चैत्रवैशाखमासद्वयात्मकः । यथा । मधुश्च माधवश्च वासन्तिकावृतुः । इति मलमासतत्त्वधृता श्रुतिः ॥ (फाल्गुनचैत्रात्मकश्चेति केचित् । वसन्तः कुम्भमीनयोरितिप्रयोगदर्शनात् ॥*॥) तत्पर्य्यायः ॥ पुष्पसमयः २ सुरभिः ३ । इत्यमरः ॥ मधुः ४ । इति शब्दरत्नावली ॥ माधवः ५ फलगुः ६ । इति जटाधरः ॥ ऋतुराजः ७ पुष्पमासः ८ पिकानन्दः ९ कान्तः १० कामसखः ११ ॥ तत्कालीनजलगुणाः । कषायत्वम् । मधुरत्वम् । रूक्षत्वञ्च । इति राजनिर्घण्टः ॥ ( यथा, ऋतुसंहारे । ६ । २ ।

"द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्व्वं प्रिये ! चारुतरं वसन्ते ॥"

यथा च ।

"हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।
प्रायेण प्रशमं याति स्वयमेव समीरणः ।
शरत्काले वसन्ते च पित्तं प्राहृतौ कफः ॥"

इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ।

"मुदितकोकिलकूजितकाननं
मदनचम्पककिंशुकशोभितम् ।
कुसुमसौरभरञ्जितभूधरं ॥
कलितमत्तमधुव्रतवासवम् ।
मकरकेतनबाणसमाकुलं
मुदितमेव समस्तमिदं जगत् ।
मलयमारुतकल्पगुणान्वितः
कफकरो हि वसन्तऋतुर्भवेत् ।
कफजकोपविनाशनानलं
वमनमावनरूक्षनिषेवणम् ॥
विविधः सुरतानन्दः संश्रमः कफवारणः ।
कटुक्षाराम्लकाः सेव्याः शोधनं कफसम्भवे ॥
व्यायामश्रमसंरोधखिन्नो विश्रान्तमानसः ।
एवं क्रियासमापन्नो नरः शीघ्रं सुखी भवेत् ॥"

इति वसन्तोपचारः ॥

इति हारीते प्रथमस्थाने चतुर्थेऽध्याये ॥*॥

"कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः ।
हत्वाग्निं कुरुते रोगानतस्तं त्वरया जयेत् ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः ।
व्यायामोद्वर्त्तनाघातैर्जित्वा श्लेष्माणमुल्वणम् ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः ।
पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक् ॥
सहकाररसोन्मिश्रानास्वाद्य प्रिययार्पितान् ।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान् ॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितो पिबेत् ।
निर्गदानासवारिष्टसीधुमार्द्वीकमाधवान् ॥
शृङ्गवेराम्बु साराम्बु मध्वम्बु जलदाम्बु वा ।
दक्षिणानिलशीतेषु परितो जलवाहिषु ॥
अदृष्टनष्टसूर्य्येषु मणिकुट्टिमकान्तिषु ।
परपुष्टविघुष्टेषु कामकर्म्मान्तभूमिषु ॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी ॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ॥"

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥

"हेमन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥
तस्माद्वसन्ते कर्म्माणि वमनादीनि कारयेत् ।
गुर्व्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्जयेत् ॥
व्यायामोद्वर्त्तनं धूमं कवड़ग्रहमञ्जनम् ।
सुखाम्बुना शौचविधिं शीलयेत् कुसुमागमे ।
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ॥
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ।
भक्षयेन्निगदं सीधुं पिबेन्माध्वीकमेव वा ॥
वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम् ॥"

इति चरके सूत्रस्थाने षष्ठेऽध्याये ॥

"मधुमाधवौ वसन्तः । फाल्गुनचैत्रौ वसन्तः । ता एवौषधयः कालपरिणामात् परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्यात् गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति ।" "पूर्व्वाह्णे वसन्तस्य लिङ्गम् ।"

"दिशो वसन्ते विमलाः काननैरुपशोभिताः ।
किंशुकाम्भोजबकुलचूताशोकादिपुष्पितैः ।
कोकिलाषट्पदगणैरुपगीता मनोहराः ।
दक्षिणानिलसंवीताः सुमुखाः पल्लवोज्ज्वलाः ॥"

इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥*॥)

अस्याधिष्ठातृदेवतोत्पत्तिर्यथा,—

मन्मथ उवाच ।

"करिष्येऽहं तव विभो वचनाद्धरमोहनम् ।
किन्तु योषिन्महास्त्रं मे ततः कान्तां भवान् सृज ॥
मया संमोहिते शम्भौ यया तस्यानुमोहनम् ।
कार्य्यं मनोरमां कामां तां निदेशय लोकभृत् ॥
तामहं नहि पश्यामि यया तस्यानुमोहनम् ।
कर्त्तव्यमधुना धातस्तत्रोपायं ततः कुरु ॥

मार्कण्डेय उवाच ।

एवंवादिनि कन्दर्पे धाता लोकपितामहः ।
कया संमोहनीयोऽयमिति चिन्तां जगाम ह ॥
चिन्ताविष्टस्य तस्याथ निःश्वासो यो विनिःसृतः ।
तस्माद्वसन्तः संजातः पुष्पव्रातविभूषितः ॥
चूताङ्कुरांस्तत्कलिकां बिभ्रद्भ्रमरसंहतिम् ।
किंशुकान् सारसा रेजे प्रफुल्ल इव पादपः ॥
शोणराजीवसङ्काशः फुल्लतामरसेक्षणः ।
सन्ध्योदिताखण्डशशिप्रतिमास्यः सुनासिकः ॥
शृङ्गवक्रवणावर्त्तः श्यामकुञ्चितमूर्द्धजः ।
सन्ध्यांशुमालिसदृशः कुण्डलद्वयमण्डितः ॥
प्रमत्तवारणगतिर्विस्तीर्णहृदयस्थलः ।
पीनस्थूलायतभुजः कठोरकरयुग्मकः ॥
सुवृत्तोरुकटीजङ्घः कम्बुग्रीवोन्नतांसकः ।
गूढ़जत्रुः पीनवक्षः संपूर्णः सर्व्वलक्षणैः ॥
तादृशेऽथ समुत्पन्ने सम्पूर्णे कुसुमाकरे ।
ववौ वायुः ससुरभिः पादपा अपि पुष्पिताः ॥
पिकाश्च नेदुः सततं पञ्चमं मधुरस्वराः ।
प्रफुल्लपद्मा अभवन् सरस्यः स्वच्छपुष्कराः ॥"

इति कालिकापुराणे ४ अध्यायः ॥*॥

हरमोहनकाले अस्य कर्म्माणि यथा,—

"मधुश्च कुरुते कर्म्म यद्यत्तस्य विमोहने ।
तत् शृणुष्व महाभाग नित्यं तस्योचितं पुनः ॥
चम्पकान् केशरानाम्रान् करुणान् पाटलांस्तथा ।
नागकेशरपुन्नागान् किंशुकान् केतकान् बकान् ॥
माधवीमल्लिकापर्णसारान् कुरुवकांस्तथा ।
उत्फुल्लयति तत्र स्म यत्र तिष्ठति वै हरः ॥
सरांस्युत्फुल्लपद्मानि वीजयन् मलयानिलैः ।
सुगन्धि कृतवान् यत्नात् अतीव शङ्कराश्रमम् ॥
लताः सर्व्वाः सुमनसो नूतनाङ्कुरसञ्चयाः ।
वृक्षान् रुचिरभावेन वेष्टयन्ति स्म तत्र च ।
तान् वृक्षांश्चारुपुष्पौघांस्तैः सुगन्धिसमीरणैः ।
दृष्ट्वा कामवशं याता न तत्र मुनिरच्युत ।
तत्रत्या अपि लोकेश नानाभावैः सुशोभनैः ।
रमन्ते स्म सुराः सिद्धा ये ये चापि तपोधनाः ॥
न तस्य पुनरत्राभिहृदं मोहस्य कारणम् ।